# Shri Mahakalabhairava Kavacham

# શ્રીમહાકાલભૈરવકવચમ્

## Document Information

Text title : mahAkAlabhairavakavacham

File name : mahAkAlabhairavakavacham.itx

Category : kavacha, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Pranav Tendulkar pranav.tendulkar at gmail.com

Proofread by : Pranav Tendulkar pranav.tendulkar at gmail.com, NA

Description-comments : Rudrayamala

Latest update : February 19, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2020

*sanskritdocuments.org*

# શ્રીમહાકાલભૈરવકવચમ્

શ્રીદેવ્યુવાચ ।
દેવદેવ મહાબાહો ભક્તાનાં સુખવર્ધન ।
કેન સિદ્ધિં દદાત્યાશુ કાલી ત્રૈલોક્યમોહન ॥ ૧॥

તન્મે વદ દયાऽऽધાર સાધકાભીષ્ટસિદ્ધયે ।
કૃપાં કુરુ જગન્નાથ વદ વેદવિદાં વર ॥ ૨॥

શ્રીભૈરવ ઉવાચ ।
ગોપનીયં પ્રયત્નેન તત્ત્વાત્ તત્ત્વં પરાત્પરમ્ ।
એષ સિદ્ધિકરઃ સમ્યક્ કિમથો કથયામ્યહમ્ ॥ ૩॥

મહાકાલમહમ્ વન્દે સર્વસિદ્ધિપ્રદાયકમ્ ।
દેવદાનવગન્ધર્વકિન્નરપરિસેવિતમ્ ॥ ૪॥

કવચં તત્ત્વદેવસ્ય પઠનાદ્ ઘોરદર્શને ।
સત્યં ભવતિ સાન્નિધ્યં કવચસ્તવનાન્તરાત્ ॥ ૫॥

સિદ્ધિં દદાતિ સા તુષ્ટા કૃત્વા કવચમુત્તમમ્ ।
સામ્રાજ્યત્વં પ્રિયં દત્વા પુત્રવત્ પરિપાલયેત્ ॥ ૬॥

કવચસ્ય ઋષિર્દેવી કાલિકા દક્ષિણા તથા
વિરાટ્છન્દઃ સુવિજ્ઞેયં મહાકાલસ્તુ દેવતા ।
કાલિકા સાધને ચૈવ વિનિયોગઃ પ્રકીર્ત્તિતઃ ॥ ૭॥

ૐ શ્મશાનસ્થો મહારુદ્રો મહાકાલો દિગમ્બરઃ ।
કપાલકર્તૃકા વામે શૂલં ખટ્વાઙ્ગમ્ દક્ષિણે ॥ ૮॥

ભુજઙ્ગભૂષિતે દેવિ ભસ્માસ્થિમણિમણ્ડિતઃ ।
જ્વલત્પાવકમધ્યસ્થો ભસ્મશય્યાવ્યવસ્થિતઃ ॥ ૯॥

વિપરીતરતાં તત્ર કાલિકાં હૃદયોપરિ ।

પેયં ખાદ્યં ચ ચોષ્યં ચ તૌ કૃત્વા તુ પરસ્પરમ્ ।
એવં ભક્ત્યા યજેદ્ દેવં સર્વસિદ્ધિઃ પ્રજાયતે ॥ ૧૦॥

પ્રણવં પૂર્વમુચ્ચાર્ય મહાકાલાય તત્પદમ્ ।
નમઃ પાતુ મહામન્ત્રઃ સર્વશાસ્ત્રાર્થપારગઃ ॥ ૧૧॥

અષ્ટક્ષરો મહા મન્ત્રઃ સર્વાશાપરિપૂરકઃ ।
સર્વપાપક્ષયં યાતિ ગ્રહણે ભક્તવત્સલે ॥ ૧૨॥

કૂર્ચદ્વન્દ્વં મહાકાલ પ્રસીદેતિ પદદ્વયમ્ ।
લજ્જાયુગ્મં વહ્નિજાયા સ તુ રાજેશ્વરો મહાન્ ॥ ૧૩॥

મન્ત્રગ્રહણમાત્રેણ ભવેત સત્યં મહાકવિઃ ।
ગદ્યપદ્યમયી વાણી ગઙ્ગાનિર્ઝરિતા તથા ॥ ૧૪॥

તસ્ય નામ તુ દેવેશિ દેવા ગાયન્તિ ભાવુકાઃ ।
શક્તિબીજદ્વયં દત્વા કૂર્ચં સ્યાત્ તદનન્તરમ્ ॥ ૧૫॥

મહાકાલપદં દત્વા માયાબીજયુગં તથા ।
કૂર્ચમેકં સમુદ્ધૃત્ય મહામન્ત્રો દશાક્ષરઃ ॥ ૧૬॥

રાજસ્થાને દુર્ગમે ચ પાતુ માં સર્વતો મુદા ।
વેદાદિબીજમાદાય ભગમાન્ તદનન્તરમ્ ॥ ૧૭॥

મહાકાલાય સમ્પ્રોચ્ય કૂર્ચં દત્વા ચ ઠદ્વયમ્ ।
હ્રીંકારપૂર્વમુદ્ધૃત્ય વેદાદિસ્તદનન્તરમ્ ॥ ૧૮॥

મહાકાલસ્યાન્તભાગે સ્વાહાન્તમનુમુત્તમમ્ ।
ધનં પુત્રં સદા પાતુ બન્ધુદારાનિકેતનમ્ ॥ ૧૯॥

પિઙ્ગલાક્ષો મઞ્જુયુદ્ધે યુદ્ધે નિત્યં જયપ્રદઃ ।
સમ્ભાવ્યઃ સર્વદુષ્ટઘ્નઃ પાતુ સ્વસ્થાનવલ્લભઃ ॥ ૨૦॥

ઇતિ તે કથિતં તુભ્યં દેવાનામપિ દુર્લભમ્ ।
અનેન પઠનાદ્ દેવિ વિઘ્નનાશો યથા ભવેત્ ॥ ૨૧॥

સમ્પૂજકઃ શુચિસ્નાતઃ ભક્તિયુક્તઃ સમાહિતઃ ।
સર્વવ્યાધિવિનિર્મુક્તઃ વૈરિમધ્યે વિશેષતઃ ॥ ૨૨॥

મહાભીમઃ સદા પાતુ સર્વસ્થાન વલ્લભમ્ । ?
કાલીપાર્શ્વસ્થિતો દેવઃ સર્વદા પાતુ મે મુખે ॥ ૨૩॥

॥ ફલ શ્રુતિ ॥

પઠનાત્ કાલિકાદેવી પઠેત્ કવચમુત્તમમ્ ।
શ્રુણુયાદ્ વા પ્રયત્નેન સદાઽઽનન્દમયો ભવેત્ ॥ ૧॥

શ્રદ્ધયાઽશ્રદ્ધયા વાપિ પઠનાત્ કવચસ્ય યત્ ।
સર્વસિદ્ધિમવાપ્નોતિ યદ્યન્મનસિ વર્તતે ॥ ૨॥

બિલ્વમૂલે પઠેદ્ યસ્તુ પઠનાદ્ કવચસ્ય યત્ ।
ત્રિસન્ધ્યં પઠનાદ્ દેવિ ભવેન્નિત્યં મહાકવિઃ ॥ ૩॥

કુમારીં પૂજયિત્વા તુ યઃ પઠેદ્ ભાવતત્પરઃ ।
ન કિઞ્ચિદ્ દુર્લભં તસ્ય દિવિ વા ભુવિ મોદતે ॥ ૪॥

દુર્ભિક્ષે રાજપીડાયાં ગ્રામે વા વૈરિમધ્યકે ।
યત્ર યત્ર ભયં પ્રાપ્તઃ સર્વત્ર પ્રપઠેન્નરઃ ॥ ૫॥

તત્ર તત્રાભયં તસ્ય ભવત્યેવ ન સંશયઃ ।
વામપાર્શ્વે સમાનીય શોભિતાં વરકામિનીમ્ ॥ ૬॥

શ્રદ્ધયાઽશ્રદ્ધયા વાપિ પઠનાત્ કવચસ્ય તુ ।
પ્રયત્નતઃ પઠેદ્ યસ્તુ તસ્ય સિદ્ધિઃ કરે સ્થિતા ॥ ૭॥

ઇદં કવચમજ્ઞાત્વા કાલં યો ભજતે નરઃ ।
નૈવ સિદ્ધિર્ભવેત્ તસ્ય વિઘ્નસ્તસ્ય પદે પદે ।
આદૌ વર્મ પઠિત્વા તુ તસ્ય સિદ્ધિર્ભવિષ્યતિ ॥ ૮॥

॥ ઇતિ રુદ્રયામલે મહાતન્ત્રે મહાકાલભૈરવકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Pranav Tendulkar pranav.tendulkar at gmail.com, NA

*Shri Mahakalabhairava Kavacham*

pdf was typeset on September 14, 2020

Please send corrections to *sanskrit@cheerful.com*